# Lambodara Stuti by Krodhasura

# લમ્બોદરસ્તુતિઃ ક્રોધાસુરેણ પ્રોક્તા

## Document Information

Text title : Lambodara Stuti by Krodhasura

File name : lambodarastutiHkrodhAsureNaproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 5, Adhyaya 8

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


May 31, 2020

*sanskritdocuments.org*

# લમ્બોદરસ્તુતિઃ ક્રોધાસુરેણ પ્રોક્તા

ક્રોધાસુર ઉવાચ -
લમ્બોદર! નમસ્તુભ્યં શાન્તિયોગસ્વરૂપિણે ।
સર્વશાન્તિપ્રદાત્રે તે વિઘ્નેશાય નમો નમઃ ॥ ૩૩॥

અસંપ્રજ્ઞાતરૂપેયં શુણ્ડા તે નાત્ર સંશયઃ ।
સંપ્રજ્ઞાતમયો દેહો દેહધારિન્! નમો નમઃ ॥ ૩૪॥

સ્વાનન્દે યોગિભિર્નિત્યં દૃષ્ટસ્ત્વં બ્રહ્મનાયકઃ ।
તેન સ્વાનન્દવાસી ત્વં નમઃ સંયોગધારિણે ॥ ૩૫॥

સમુત્પન્નં ત્વદુદરાજ્જગન્નાનાવિધં પ્રભો ! ।
બ્રહ્મ તદ્વન્ન સન્દેહો લમ્બોદર નમોઽસ્તુ તે ॥ ૩૬॥

ત્વદીયકૃપયા દેવ મયા જ્ઞાતં મહોદર ! ।
ત્વત્તઃ પરતરં નાસ્તિ પરેશાય નમો નમઃ ॥ ૩૭॥

હેરમ્બાય નમસ્તુભ્યં વિઘ્નહર્ત્રે કૃપાલવે ।
આદિમધ્યાન્તહીનાય તન્મયાય નમો નમઃ ॥ ૩૮॥

સિદ્ધિબુદ્ધિનિહારજ્ઞ! સિદ્ધિબુદ્ધિપતે નમઃ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે તે વક્રતુણ્ડાય વૈ નમઃ ॥ ૩૯॥

સર્વાત્મકાય સર્વાદિપૂજ્યાય તે નમો નમઃ ।
સર્વપૂજ્યાય વૈ તુભ્યં ભક્તસંરક્ષકાય ચ ॥ ૪૦॥

અતઃ પ્રસીદ વિઘ્નેશ! દાસોઽહં તે ગજાનન! ।
લમ્બોદરાય નિત્યં નમો નમસ્તે મહાત્મને ॥ ૪૧॥

સ્વત ઉત્થાનપરત! ઉત્થાને બ્રહ્મ ધારયન્ ।
તવોદરાત્ સમુત્પન્નં તં કિં સ્તૌમિ પરાત્પરમ્ ॥ ૪૨॥

ઇતિ સ્તુત્વા મહાદૈત્યઃ પ્રણનામ ગજાનનમ્ ।

તમુવાચ ગણાધ્યક્ષો ભક્તં ભક્તજનપ્રિયઃ ॥ ૪૩॥

લમ્બોદર ઉવાચ ।
વરં વૃણુ મહાભાગ ક્રોધાસુર હૃદીપ્સિતમ્ ।
દાસ્યામિ ભક્તિભાવેન સ્તોત્રેણાઽહં હિ તોષિતઃ ॥ ૪૪॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
યઃ પઠિષ્યતિ તસ્યૈવ ક્રોધજં ન ભયં ભવેત્ ॥ ૪૫॥

શ‌ૃણુયાત્તસ્ય તદ્વચ્ચ ભવિષ્યતિ ન સંશયઃ ।
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૪૬॥

ઇતિ ક્રોધાસુરેણ પ્રોક્તા લમ્બોદરસ્તુતિઃ સમાપ્તા । ૫.૮

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

---

*Lambodara Stuti by Krodhasura*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*